आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं
पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः ।
सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो
यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम्।

(४, श्रीमच्छङ्कराचार्यविरचिता शिवमानसपूजा)

पदच्छेदः - आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं, पूजा ते विषय-उपभोगरचनाः निद्रा समाधिस्थितिः । सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वाः गिरः, यत् यत्कर्म करोमि तत् तत् अखिलं शम्भो तव आराधना ॥

अन्वयः - हे शम्भो! (मम) आत्मा त्वं, मतिः गिरिजा, प्राणाः सहचराः, शरीरं गृहं, विषयोपभोगरचनाः ते पूजा, निद्रा समाधिस्थितिः, पदयोः सञ्चारः प्रदक्षिणविधिः, सर्वा गिरः स्तोत्राणि, यद्यत्कर्म करोमि तत् तत् अखिलं तव आराधना ॥

व्याख्या – कश्चिद् भक्त ईश्वरं प्रार्थयति ! हे शम्भो! इत्युक्ते हे महादेव ! हे परमेश्वर! हे सदाशिव! मम आत्मा त्वं भवसि, मम मतिः नाम बुद्धिः गिरिजा भवति । गिरिजा, अर्थात् गिरेः नाम पर्वतात् जायते जाता भवति वा इति गिरिजा । इत्युक्ते हिमालयात् गिरेः जायते स्म । अतः सा गिरिजा, पार्वती वा कथ्यते । सा मम बुद्धिः भवति । मम प्राणाः तव सहचराः भवन्ति । इत्युक्ते मम पञ्चप्राणाः तव सहचराः नाम तव गणाः, तव सेवका भवन्ति, शिवगणाः भवन्ति । मम शरीरं नाम मम देहः तव गृहं भवति इत्युक्ते मम देहः तव मन्दिरं भवति । मम विषय-उपभोग-रचना तव पूजा भवति । अर्थात् संसारस्य येषां

विषयाणां नाम पार्थिवानां वस्तुनाम् उपभोगं करोमि भोगं वा करोमि, ते सर्वे विषयाः तव पूजा-स्वरूपा भवन्ति । मम निद्रा नाम मम शयनं तव समाधिस्थितिः भवति । अर्थात् मम निद्रा तव समाधिरूपा ध्यानरूपा वा भवति । मम पदयोः सञ्चारः नाम भ्रमणं तव प्रदक्षिणविधिः भवति । अर्थात् मम पादद्वयस्य भ्रमणं, गमनं वा तव प्रदक्षिणविधिः इव भवति, तव चतुर्पार्श्वे भ्रमणम् इव भवति। मम सर्वाः गिरः अर्थात् सर्वाणि वचनानि तव स्तोत्राणि इव भवन्ति । अतः अहं यद् यत् कर्म करोमि यद् यत् कार्यं कर्तव्यं वा करोमि सम्पादयामि वा तत् सर्वम्  अखिलं नाम सम्पूर्णं पूर्णरूपेण वा, हे शम्भो, महादेव, परमेश्वर, सदाशिव, तव आराधना, पूजा, उपासना वा भवति । अतः एतेभ्यः कर्मभ्यः भिन्नरूपेण तव पूजायाः आवश्यकता मम कृते न भवति । यदि कस्यचिद् भक्तस्य कस्यचिन्नरस्य वा एतादृशी दृढनिष्ठा भवेत् तर्हि तस्य तादृशी सिद्धिरपि भवेत् । तस्य कृते भिन्नरूपेण स्वतन्त्रभावेन वा मन्दिरं गत्वा भगवतः शिवस्य पूजायाः आवश्यकता न भवति भविष्यति वा ।  इति एतस्य सुभाषितस्य आशयः ॥

सुभाषितमिदं शार्दूलविक्रीडितम् इति छन्दसा रचितमस्ति । तस्य छन्दसः लक्षणं भवति =

॥ सूर्याश्वैर्यदि मः सजौसततगाः शार्दूलविक्रीडितम् ॥

एतस्मिन् छन्दसि चत्वारः पादा भवन्ति । प्रत्येकस्मिन्पादे नवदश-अक्षराणि भवन्ति । तत्र म, स, ज, स, त, त, ग, इति गणा भवन्ति । द्वादशाक्षरेभ्यः परं, ततः सप्ताक्षरेभ्यः परं नाम अन्तिमाक्षरात् परं विरामो भवेत् । एतत्समवृत्तमस्ति ।

The metre *śārdūlavikrīḍita* is a *samavṛtta*. It has nineteen syllables in each quarter and there can be pause after twelve and seven syllables. The term *sūrya* denotes number twelve and *aśva* denotes number seven (12 + 7 = 19).

**S S S I I S I S I I I S S S I S S I S**
**1 2 3 4 5 6 7 8 9 10 11 12 13 14 15 16 17 18 19**

Note: – S Stands for *guru,* and I Stands for *laghu.*

La (ल) is used to denote a short syllable (I), Ga (ग) a long syllable (S).

आ त्मा त्वं गि रि जा म तिः स ह च राः प्रा णाः श री रं गृ हं

पू जा ते वि ष यो प भो ग र च ना नि द्रा स मा धि स्थि तिः

स ञ्चा रः प द योः प्र द क्षि ण वि धिः स्तो त्रा णि स र्वा गि रो

य द्य त्क र्म क रो मि त त्त द खि लं श म्भो त वा रा ध नम्

Each line has 19 syllables with following distribution short and long syllables: *gu* stands for *guru* (heavy, long) and *la* stands for *laghu* (light, short). This is the pattern for each of the four verses:

गु गु गु ल ल गु ल गु ल ल ल गु गु गु ल गु गु ल गु